यथा,—
"अप्सु वसिमन्नहोरात्रे पूर्व्वं विशति चन्द्रमाः ।
ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ॥
छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे ।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥"
इति श्रीविष्णुपुराणे २ अंशे १२ अध्यायः ॥*॥
आश्रमे रोपणीया शुभदा लतादिर्यथा,—
"अलावुश्चापि कुष्माण्डं मायाम्बुश्च सुकासुकः ।
खर्ज्जूरी कर्कटी चापि शिविरे मङ्गलप्रदा ॥
वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा ।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥
शाखा । प्रियङ्गुः । (अस्याः पर्य्यायो यथा,—
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया ।
गुन्द्रा गुन्द्रफला श्यामा विष्वक्सेनाङ्गना-
प्रिया ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
एका । ( यथास्याः पर्य्यायः ।
"तस्करी चारकश्चण्डो देवी एका लता लघुः ॥"
इति वैद्यकरत्नमालायाम् ॥)
अग्निपर्णी । इत्यमरः ॥ ज्योतिष्मती । (अस्याः पर्य्यायो यथा,—
"ज्योतिष्मती स्यात् कटभी ज्योतिष्का कङ्गुनी-
ति च ।
पारावतपदी पण्या लता प्रोक्ता ककुन्दनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
लताकस्तूरिका । माधवी । दूर्व्वा । इति मेदिनी । ते, ५१-५२ ॥ कैवर्त्तिका । सारिवा । इति राजनिर्घण्टः ॥ ( हस्ती । तत्पर्य्यायो यथा,—
"भण्डाकी हस्ती सिंही वार्त्ताकी राष्ट्रिका-
कुली ।
प्रसहा रक्तपाका च लता हस्तिका परा ॥")
नारी । यथा,—
"नर्त्तां परलतां पश्यन् अयुतं यस्तु साधकः ।
प्रजपेत् स भवेत् शीघ्रं विद्याया वल्लभः स्वयम् ॥"
इति तन्त्रसारे श्यामासाधनम् ॥
(तथा च नैषधे । १ । ८५ ।
"नवा लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः ।
दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥"
"नवा नवीना लता माधवीलता पक्षे नवा रम्या लता स्त्री ।" इति तट्टीका ॥*॥ अप्सरोविशेषः । यथा, महाभारते । १ । २१७ । २० ।
"अद्यश्च सौरभेयी च समीची वुद्वुदा लता ।
यौगपद्येन तं विप्रमभ्यगच्छाम भारत ! ॥")
लताकरञ्जः, पुं, ( लतारूपः करञ्जः । ) करञ्जविशेषः । काण्टकरेज इति हिन्दी भाषा । तत्पर्य्यायः । दुष्पर्शः २ वीराख्यः ३ वज्रवीजकः ४ धनदाची ५ कण्टफलः ६ कुवेराची ७ । अस्य पत्रगुणाः । कटुत्वम् । उष्णत्वम् । कफवातनाशित्वञ्च । तद्बीजगुणाः । दीपनत्वम् । पथ्यत्वम् । शूलगुल्मविषापहत्वञ्च । इति राजनिर्घण्टः ॥
लताकस्तूरिका, स्त्री, ( लतारूपा कस्तूरी तद्वद्गन्धत्वात् । ततः स्वार्थे कन् । ) लताकस्तूरी । तत्पर्य्यायः । कटुः १ दक्षिणदेशजा २ । अस्या गुणाः । तिक्तत्वम् । स्वादुत्वम् । वृष्यत्वम् । हिमत्वम् ।लघुत्वम् । चक्षुष्यत्वम् । छेदनीत्वम् । श्लेष्मतृष्णावस्त्यास्यरोगनाशित्वञ्च । इति पथ्यापथ्यविवेकः ॥ अपि च ।
"लताकस्तूरिका तिक्ता स्वाद्वी शीतास्य-
रोगनुत् ॥"
इति राजवल्लभः ॥
लताजिह्वः, पुं, ( लतेव जिह्वा यस्य । ) सर्पः । इति शब्दमाला ॥
लतातरुः, पुं, ( लतेव दीर्घस्तरुः । ) नारङ्गवृक्षः । तालवृक्षः । इति शब्दमाला ॥ शालवृक्षः । इति त्रिकाण्डशेषः ॥
लताद्रुमः, ( लतेव द्रुमः दीर्घत्वात् । ) लताशालः । तत्पर्य्यायः । तार्क्षः २ अश्वकर्णः ३ कुशिकः ४ वत्सः ५ दीर्घः ६ । इति रत्नमाला ॥
लतापनसः, पुं, ( लतायां पनसमिव फलमस्य । ) फललताविशेषः । तरमुज इति ख्यातः । तत्पर्य्यायः । चेलालः २ चित्रफलः ३ सुखाशः ४ राजतेमिषः ५ नाटाम्रः ६ सेडुः ७ । इति त्रिकाण्डशेषः ॥
लताएका, स्त्री, ( लताप्रधाना एका । ) समुद्रान्ता । इति शब्दरत्नावली ॥ पिङ्गिशाक इति भाषा ॥
लताप्रतानिनी, स्त्री, ( लताप्रतानोऽस्त्यस्येति । इनिः । ) शाखाप्रचयवती लता । तत्पर्य्यायः । वीरुत् २ गुल्मिनी ३ उलपः ४ । इत्यमरभरतौ ॥ वीरुधा ५ वरुत् ६ । इति शब्दरत्नावली ॥ प्रतानी ७ कचः ८ । इति जटाधरः ॥
लताफलं, क्ली, ( लतायां फलमस्य । ) पटोलः । यथा,—
"वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदा ।
लताफलञ्च शुभदं सर्व्वं सर्व्वत्र निश्चितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥
लताभद्रा, स्त्री, (लतया भद्रा यस्याः ।) भद्रालीवृक्षः । इति शब्दमाला ॥
लतामणिः, पुं, ( लतासदृशो मणिः । ) प्रवालः । इति त्रिकाण्डशेषः राजनिर्घण्टश्च ॥ ( प्रवालशब्देऽस्य विवरणं ज्ञातव्यम् ॥ )
लतामरुत्, स्त्री, (लतायां मरुत् यस्याः ।) एका । इति शब्दरत्नावली ॥
लतामाधवी, स्त्री, ( लताप्रधाना माधवी । ) माधवीलता । इति शब्दरत्नावली ॥
लतायष्टिः, स्त्री, ( लता यष्टिरिव । ) मञ्जिष्ठा । इति शब्दमाला ॥
लतायावकं, क्ली, (लतायां याव इव यस्य । कन् ।) प्रवालम् । इति हारावली । ६१ ॥ (गुणादयोऽस्य प्रवालशब्दे ज्ञेयाः ॥ )
लतारसनः, पुं, ( लतेव रसना यस्य । ) सर्पः । इति हारावली । १५ ॥
लतार्कः, पुं, ( लता अर्क इव तीव्रा यस्य । ) हरितपलाण्डुः । तत्पर्य्यायः । द्रुद्रुमः २ । इत्यमरः ॥
लतालकः, पुं, हस्ती । इति त्रिकाण्डशेषः ॥
लतावेष्टः, पुं, ( लतयेव आवेष्टो वेष्टनं यत्र । ) षोडशरतिबन्धान्तर्गततृतीयबन्धः । यथा,—
"बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा स्त्रियं रमेत् ।
लघुलिङ्गताडनं योनौ लतावेष्टोऽयमुच्यते ॥"
इति रतिमञ्जरी ॥ * ॥
पर्व्वतविशेषः । यथा,—
"अन्वेषणे निरुद्धस्य चरान् यादवपान् तदा ।
अभ्यन्तरञ्च मार्गध्वं वाह्यतश्च समन्ततः ॥
वेणुमन्तं लतावेष्टं तथा रैवतकं गिरिम् ।
ऋक्षवन्तं गिरिञ्चैव मार्गध्वं त्वरिता हयैः ॥"
इति हरिवंशे वाणयुद्धम् ॥
( पर्व्वतोऽयं द्वारकाया दक्षिणस्यां दिशि स्थितः । यथा, तत्रैव । १५५ । १६ ।
"दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते ।
इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः ॥")
लतावेष्टितकं, क्ली, ( लतयेव वेष्टितं वेष्टनं यत्र । कन् ।) आलिङ्गनभेदः । यथा, शब्दमालायाम् ।
"उद्धृष्टकं पीडितकं लतावेष्टितकं तथा ॥"
लताशङ्खः, पुं, शालवृक्षः । इति शब्दरत्नावली ।
लतासाधनं, क्ली, ( लतया स्त्रिया साधनम् । ) योषिद्धिकरणकेष्टदेवताराधनम् । तद्यथा,—
"लतायाः साधनं वक्ष्ये शृणुष्व हरवल्लभे ।
शतं केशे शतं भाले शतं सिन्दूरमण्डले ॥
स्तनद्वन्द्वे शतद्वन्द्वं शतं नाभौ महेश्वरि ।
शतं योनौ महेशानि उत्थाय च शतत्रयम् ॥
एवं दशशतं जप्त्वा सर्व्वसिद्धीश्वरो भवेत् ।
अथान्यत् संप्रवक्ष्यामि साधनं भुवि दुर्लभम् ॥
रजोऽवस्थां समानीय तद्योनौ स्वेष्टदेवताम् ।
पूजयित्वा महारात्रौ त्रिदिनं पूजयेन्मनुम् ॥
शतत्रयञ्च षट्त्रिंशदधिकं प्रत्यहं जपन् ।
अष्टोत्तरंशतं पूर्व्वं चक्रवक्त्रे जपेद्बुधः ॥
ततस्तां नवभिः पुष्पैर्जपेदष्टोत्तरं शतम् ।
ततः पूर्णाहुतिं दत्त्वा जपेदष्टोत्तरं शतम् ॥
धनवान् बलवान् वाग्मी सर्व्वयोषित्प्रियङ्करः ।
षोडशाहेन च भवेत् सत्यं सत्यं न संशयः ॥"
इति मायातन्त्रे १२ पटलः ॥
अन्यत् अन्नदाकल्पे १६ पटले गुप्तसाधनतन्त्रे ४ पटले च द्रष्टव्यम् ॥
लतिका, स्त्री, लता । इति लताशब्दात् स्वार्थे कन्प्रत्ययेन ष्णिकप्रत्ययेन वा निष्पन्नम् ॥
( यथा,—
"इयं सन्ध्या दूरादहमुपगतो हन्त मलयात्
तदेकां त्वद्गेहे विनयवति । नेष्यामि रजनीम् ।
समीरेणोक्तैवं नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः ॥)